संस्कृत-

स्तोत्र

नवग्रहस्तोत्र

६१८ | स्तो: १२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीवरदमूर्तयेनमः॥ अस्यश्रीनवग्रहयंत्रस्य॥ श्रीरुद्रऋषिः॥ नव
ग्रहोदेवता॥ अनुष्टुप्छंदः॥ नवग्रहयंत्रपठधारणउत्धारणेविनियोगः॥
यदायुगेद्वापारांरेव्यवनवासेचपांडवाः॥ दरिद्रवेष्टिताःसर्वेपंचपां
चालिसंयुताः॥१॥ तत्रसर्वेविचार्यैवंपरस्परंचबंधुभिः॥ दरिद्रहर
णार्थायचिंतयंतिपरस्परं॥२॥ भीमउवाच॥ सोमवंशेमहाश्रेष्ठोय
दुराजाप्रतापवान्॥ द्रौपदीचमहासत्वासर्वदारिद्र्यवेष्टिताः॥३॥
प्रथमोधर्मराजाचयद्युःश्रेष्ठःप्रतापवान्॥ बृहस्पतिसमोबुध्या
राजराजोयुधिष्ठिरः॥४॥ द्वितीयोममदेहश्चमहाभीमपराक्रमः
॥ तृतीयश्चधनुर्धारीसत्यप्रज्ञोधनंजयः॥५॥ चतुर्थोनकुलोबंधुः राम
क्षत्रियेषतिवीर्यवान्॥ पंचमःसहदेवश्चज्योतिषज्ञानसिध्दिमान् ॥१॥
॥६॥ पंचभिस्तुसमायुक्ताद्रौपदीस्वापिदुर्बला॥ सर्वेदारिद्रतांप्राप्तः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1A)

बुद्धिहीनाम्यवस्थिताः ॥ ७ ॥ बलिदानंचधर्मश्च सर्वेस्यस्कावनेस्थिता
ः ॥ उपास्यकंकरिष्यामोवदतादुर्भगापहं ॥ ८ ॥ स्तवैरपिचकिंकार्यमत
त्कृण्वंतुमेवचः ॥ अर्जुनउवाच ॥ सत्यंवदसिभीमत्वंयत्प्राप्यमधुनाकृ
यं ॥ ९ ॥ दारिद्रंस्कमहाघोरंकथमस्मात्प्रमोचनं ॥ लक्ष्मीविरहितेनापी
किंकार्यमभिजीवितं ॥ १० ॥ शृणुध्वंपांडवाःसर्वेउपायस्तत्रचिंतितः ॥
जीवितंकुशलायातंधनधान्यसमाकुलं ॥ ११ ॥ नकुलउवाच ॥ नित्यमा
र्गेणचास्माकंलक्ष्मीप्राप्तिःकथंभवेत् ॥ शृणुधर्ममहाराजउपायस्त
विचार्यतां ॥ १२ ॥ सहदेवउवाच ॥ यदेकाचिंतितंकार्यंतत्सर्वेशुभदायकं
॥ चिंतनीयःकृष्णदेवःसचोपायंवदिष्यति ॥ १३ ॥ द्रौपद्युवाच ॥ स्ता
ध्यतांकृष्णदेवोसौआकांतेचिंतितंमया ॥ तस्यदर्शनमात्रेणदारिद्रं
नोपजायते ॥ १४ ॥ युधिष्ठिरउवाच ॥ साधूक्तंबांधवाःसर्वेदियोस्मा

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

ग्रह.च ॥२॥

कंजनार्दनः॥सचेत्कथ्यतितत्कुर्याद्येनाहंप्राप्नुयांसुखं॥१५॥शुचि
स्थानेतथैकांतेधर्मराजोव्यवस्थितः॥ध्यानंधृत्वाकृष्णदेवंप्रार्थय
न्शुचिमानसः॥१६॥देवदेवजगन्नाथविश्वजीवनतारक॥अस्मा
कंनष्टनाशनयशीघ्रमागम्यतांविभो॥१७॥अकस्माद्द्वारकानाथो
ज्ञानविस्मितमानसः॥रुक्मिणीप्राहभगवन्शृणुवाक्यंममप्रिये॥
१८॥वर्गांतेधर्मराजोमेस्मरणंकुरुतेधुना॥तस्मान्मयाद्यगंतव्यंशी
घ्रमेवसुनिश्चितः॥१९॥विहगंचिंतयंस्तत्रक्षणाद्दागतःपक्षिरा
ट्॥तस्यपृष्ठेसमारुह्यतत्क्षणात्स्मयपोवने॥२०॥यत्रतेपांडवाआसं
स्तत्रशीघ्रंसमाययो॥पंचैवपांडवास्तेपिप्रणेमुस्तंजनार्दनं॥२१॥पं
चबंधुसमायुक्तोपांडवोथयुधिष्ठिरः॥स्नेहेननेत्रसद्भावमलक्षत
सुपादयोः॥२२॥पापोहंपापकर्माहंपापात्मापापसंभवः॥त्राहिमां

राम ॥२॥

(2A)

मांपुंडरीकाक्षशरणागतवत्सल ॥ २३ ॥ प्रीतिभावेनवाशहाशालिलि
गतुर्गेरखातू ॥ महामहायतेश्वर्यपीद्रोपदीमालिलिंग्यच ॥ २४ ॥ आ
सनंकल्पितंतस्मैरुष्णदेवायशार्ङ्गिणे ॥ पंचबंधुसमायुक्तः पूज
यामासयाद्रवं ॥ २५ ॥ तीर्थैश्चवंदितंसर्वैश्चिंतिताघविनाशनं ॥ श्र
ध्ययापूजितंतस्मैरुष्णप्रोवाचचवचनंशुभं ॥ २६ ॥ श्रीरुष्णउवाच ॥ पं
चबंधुसमायुक्तोद्रौपद्यासहितस्वयं ॥ वर्तमानःकाननेषुकिंतेक्षे
मास्तिसांप्रतं ॥ २७ ॥ युधिष्ठिरउवाच ॥ येकेग्राममसंज्ञातासांप्र
तंवनवासिनः ॥ तेसर्वेविरुय्यातांभवतोदर्शनेनहि ॥ २८ ॥ आप
द्रामपहंतास्यमक्षेमंमारशंकथं ॥ क्षेमत्वत्रूपयादेवर्ततेमम
सर्वदा ॥ २९ ॥ परंदारिद्र्यतांप्राप्तावनवासेनवेत्सिकिं ॥ केनोपायेन
दारिद्र्यंनस्यान्मेगदहदप्रभो ॥ ३० ॥ उपायंकथयस्वामिन्तदर्थंनिंतिगाम्

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

ग्रह·त्र ॥२॥

या ॥ दानंनाथव्रतंश्रेष्ठंस्तोत्रमंत्रजपोथवा ॥ २१ ॥ श्रीकृष्णउवाच ॥ वन
वासेमहाकष्टंदारिद्रंपतितंतव ॥ तस्माद्दारिद्र्यनाशायउपायंकथया
म्यहं ॥ २२ ॥ युधिष्ठिरउवाच ॥ कोमंत्रःकिंव्रतध्यानंकिंजाप्यंचस्तुनि
ग्रहं ॥ लक्ष्मीप्राप्तोचकासिद्धिस्ततत्सर्वंकथयप्रभो ॥ २३ ॥ श्रीकृष्ण
उवाच ॥ कृतेपद्मपुराणेवैमहादेवमुखाछ्रुतं ॥ उमयापरिपृष्टंच
ग्रहयंत्रसविस्तरं ॥ २४ ॥ एतद्गुह्यंमहागुह्यंपार्वत्यैतेननिरूपितं ॥ त
च्छृणुष्वमहाभागयथावत्कथयामिते ॥ २५ ॥ पुराकृतयुगस्यादौकै
लासेतुमहेश्वरः ॥ सिंहासनोपविष्टस्तुगणेशस्कंदसंयुतं ॥ २६ ॥
विष्णुस्तद्दक्षिणेभागेवामभागेप्रजापतिः ॥ संमुखा स्त्वराधीशाः राम
पृष्ठतस्तेखिलास्सुराः ॥ २७ ॥ रंभाचनिकटेतत्रजानुदेशेचपार्व ॥२॥
ती ॥ नारदस्तुंबरश्चापिगंधर्वश्चसरस्वती ॥ २८ ॥ उर्वशीसर्व

(3A)

योगिन्यो देवगंधर्वकन्यकाः ॥ गीतं नृत्यं च विविधं कृत्वा तुष्टो महेश्वरः
॥ ३९ ॥ एतस्मिन्नंतरे चैव प्रसंनवदनस्मितं ॥ दृष्ट्वा पार्वती देवी पप्र
च्छ परमेश्वरं ॥ ४० ॥ पार्वत्युवाच ॥ देव चूडामणे शंभो सर्वज्ञः शशिशे
खरः ॥ त्वत्प्रसादाद्यतं सर्वं सर्वशास्त्रागमादिकं ॥ ४१ ॥ नानाकौतुक
हेलां च ऐहिकामुष्मिकाप्रदा ॥ इदानीं श्रोतुमिच्छामि यन्मे मनसि वर्त
ते ॥ ४२ ॥ तन्मे कथय देवेश भक्तानुग्रहकारक ॥ विना यज्ञजपाद्दीनि
विना च मंत्रसाधनं ॥ ४३ ॥ पुरश्चर्यं विना चैव विना दानमनेकधा ॥
शाक्तयश्च न पश्चर्यं विना चेंद्रियनिग्रहं ॥ ४४ ॥ यस्य संग्रहमात्रेण
जायते मनसेप्सितं ॥ कलौ कर्मपरिभ्रष्टं ससाचारविवर्जितं ॥ ४५ ॥
सर्वेप्सितफलं सद्यो धनधान्यसमाकुलं ॥ न चौराग्निभयं तस्य शत्र
वो मित्रतां गताः ॥ ४६ ॥ राजानो वशमायांति विवादे विजयो भवेत् ॥

(5)

ग्रह०च
॥४॥ इत्यादीन्यपिकार्याणिसाध्यासाध्यानिसर्वशः ॥४७॥ लभतेत्वमि
तंयेनतत्सर्वंरूपयावद ॥ इतितद्वचनंश्रुत्वाप्रत्युवाचमहेश्वरं ॥४८
शृणुपार्वतीयत्नेनयन्मांत्वंपरिपृच्छसि ॥ विनापुण्यव्रतेनैवयेनसर्व
मवाप्यते ॥४९॥ उपास्यजायतेसिद्धिर्वैराग्यज्ञानसाधनं ॥ ततोमंत्र
जपेनैवलभतेमनसेप्सितं ॥५०॥ संपदामखिलानांतुसारभूतंच
तुष्टयं ॥ वर्ततेयस्यगेहेपितस्यश्रीः सर्वतोमुखी ॥५१॥ सत्यंसत्यं
विजानीहिसारात्सारमयोहितं ॥ लभेत्सत्ययुगेदेवितथाकलियु
गेपिवा ॥५२॥ प्राप्यतेयेनसकलंसर्वहान्मनसेप्सितं ॥ निधौसं
स्पर्शनादेवलोहंभवतिकांचनं ॥५३॥ तादृशंयंत्रमेतत्तुसर्वकाम राम
फलप्रदं ॥ मुखेनैकेनरुद्राक्षोयस्यगेहेव्यवस्थितः ॥५४॥ तस्यदारि ॥४॥
द्र्यनाशस्यात्तज्ज्ञानेनैवलभ्यते ॥ चतुर्मुखाविष्णुमूर्तिःशालग्रामेष्व

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(4A)

चस्थिता ॥ ५५ ॥ तस्यगेहेसमाद्धिर्धनधान्यसमाहितः ॥ निसंरामां
किनायस्यमुद्रिकागृहसंस्थिता ॥ ५६ ॥ तद्गृहे सर्वसंपन्निर्दुःखदारि
द्र्यवर्जिता ॥ एतेषुचपदार्थेषुयेकंयस्यगृहेक्वचित् ॥ ५७ ॥ लभतेपूर्व
पुण्येनसत्यंसत्यंवरानने ॥ नमध्येगृहयंत्रंतुमहाश्रेष्ठमहाद्भुतं ॥ ५८
एतदेवमहासारंत्रैलोक्येसचराचरं ॥ महावश्यंमहाकीर्तिराजाभवति
भूतले ॥ ५९ ॥ सर्वसिद्धिःकरेतस्यमननसायद्यदिच्छति ॥ नास्तितेनसमं
वस्तुकंल्पकोटिशतैरपि ॥ ६० ॥ सत्यंसत्यपुनःसत्यंश्रृणुत्वंदेविपार्व
ती ॥ श्रीदेव्युवाच ॥ यंत्रोत्धारंसविस्तारं नानरूपजगत्पते ॥ ६१ ॥ यत्रुम
हस्यशेषेणयद्यहंतववल्लभा ॥ ईश्वरउवाच ॥ ऊर्ध्वरेखादशप्रोक्तास्ति
र्यग्रेखास्तथादश ॥ ६२ ॥ चंद्रमावर्तकोष्ठेषुग्रहयंत्रंलिखेद्बुधः ॥ पूर्वपश्चि
मयेधम्ब्ववेधश्चोत्तरदक्षिणे ॥ ६३ ॥ आग्नेयवायुदिग्वेधएशानैर्ऋतयो

(5)

ग्रह·त्र ॥५॥ स्तथा॥ चतुःकोणेषुचैतेषुनखेटोनचदृश्यते॥ ६४॥ यंत्रमध्येग्रहोराजापरि
वेषेवसुग्रहाः॥ गणनानवकोष्ठेषुचत्वारिंशातिपंचच॥ ६५॥ एवंनवसुको
ष्ठेषुगणनायत्रकुत्रचित्॥ एवंसंशोध्यकर्तव्यंयंत्रराजमिमंप्रिये॥ ६६॥
लेखनीयःप्रयत्नेनचैवाघाटनिवर्जितः॥ अन्येषुशेषमासेषुलिखितंशु
भदंभवेत्॥ ६७॥ मूलार्केवापिपुष्यार्केहस्तार्केवालिखेद्बुधः॥ सुमुहूर्तेशु
भदिनेचंद्रताराबलान्विते॥ ६८॥ पूर्वाह्णकालेविलिखेदेकचित्तःसुबुद्धि
मान्॥ एकांतेचशुचिस्थानेशुचिर्भूत्वासमाहितः॥ ६९॥ आलसेनोच्चरेरवा
सुहिंगुलेनाथवातथा॥ लेखन्यागंधाष्टकेनांकालेखनीचंपकस्यच॥ ७०॥
गंधाष्टकंचविज्ञेयंचंदनंरक्तचंदनं॥ कर्पूरकेशरंचैवकस्तूरीरोचनंतथा॥ राम
॥ ७१॥ आगरुंदेवदारुंचगंधाष्टकमुदाहृतं॥ भूर्जेतस्वर्णेतथारौप्येयंत्र ॥५॥
राजमिमंप्रिये॥ ७२॥ प्राणानांस्थापनंकृत्वाआगमोक्तविधानतः॥ त

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

थेनमात्रकान्मासंभूतस्तुतिभिप्रपूर्वकं॥७३॥जपोवैदिकमंत्रैश्चस्वश्ग
स्वोक्तैर्विधानतः॥अयुतंवासहस्त्रंवाप्रत्येकंचपृथक्पृथक्॥७४॥यंत्र
प्रारंभकालेचविघ्नराजंप्रपूजयेत्॥निर्विघ्नंकुरुदेवेशप्रार्थयेच्चपुनःपु
नः॥७५॥विधिमेवंपुराकृत्वापश्चाद्धोमंसमाचरेत्॥प्राङ्मुखोदङ्
मुखोवापिउपविश्यासनेशुभे॥७६॥स्वस्तिवाचनपूर्वंचग्रहयंत्रंसमा
रभेत्॥वाजसन्यचशाखोक्तंकलशंचप्रतिष्ठितं॥७७॥कुंभाग्रेवैणवं
पात्रंरक्तवस्त्रेणशोभितं॥कुंकुमाष्टदलंतस्मिन्स्थाप्ययंत्रंतुतत्रच
॥७८॥षोडशोपचारैःसंपूज्यकृत्वाचाष्टोत्तरंशतं॥प्रत्येकंप्रतिमंत्रेण
हुमंतत्रैतिलाक्षताः॥७९॥काष्ठहोमेप्रतिखगंपृथक्द्रव्याणिहोमयेत्॥
तिलामाषाशालयश्चगोधूमाश्चयवास्तथा॥८०॥चणकायावनालाः
श्चप्रियंगुमुद्गकास्तथा॥एवंकृत्वाग्रहाणांवैदानंदेयंयथोचितं॥८१॥

... the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai ... project

ग्रह.प्र
॥ ६ ॥

यंत्रंकुमारीसूत्रेणवेष्टयेन्नवतंतुभिः ॥ वाहौवापिगलेवापिउत्तमां
गेथवाहयेत् ॥ ८२ ॥ नित्यंपूजाप्रकर्तव्यागंधाद्यैःसुमनोहरैः ॥ ग्रह
यंत्रमितिप्रोक्तंसिद्धःसाध्येनसाधकः ॥ ८३ ॥ इतिग्रहयंत्रविधिः
समाप्तः ॥ छ ॥ श्रीरामचंद्रार्पणमस्तु ॥ श्रीरामसमर्थ ॥ छ ॥
अथप्रकारांतरेणोच्यते ॥ यन्मंडलंयथावर्णंयंत्रराजंचलेखयेत् ॥
पूजयेद्गंधमाल्यादिनानाभक्ष्यैःफलैर्दलैः ॥ १ ॥ होमद्रव्यैश्चपूर्वो
क्तैःप्रत्येकंप्रतिमंत्रितः ॥ अष्टोत्तरशतंकृत्वाबलिंपूर्णाहुतिंतथा ॥
२ ॥ रक्तःकृष्णस्तथापीतंशुभ्रंनीलंचकौशिकं ॥ हारिद्रंचैवमांजिष्ठं
कौसुंभंचक्रमेणहि ॥ ३ ॥ अलाभेरक्तवस्त्रंतुग्रहप्रीत्यैप्रदापयेत् ॥
रक्तवर्णराजतंताम्रंकांस्यंलोहंचमृन्मयं ॥ ४ ॥ दद्याद्दानंद्विजातीनां
मजागोमहिषीवृषं ॥ अश्वेतिवाहनंदद्याद्धोमशेषंसमापयेत् ॥ ५

राम
॥ ६ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

तत्रकार्पासयेत्कस्वंकुमार्यास्तंतुरज्जुना ॥ स्फुटंवेष्टयेद्यंत्रंपू
जयेच्चप्रयत्नतः ॥ ६ ॥ अथप्रयोगंवक्ष्यामिहयनात्कार्यसिध्दिदं ॥
संपूज्यविधिवद्यंत्रंप्रार्थयेन्मनसेप्सितं ॥ ७ ॥ ततोहोमंप्रकुर्वीतद्रव्य
भेदैश्चपांडव ॥ हरिद्रास्तंभनेद्रव्यंलवणंबंधमोचने ॥ ८ ॥ उच्चाटने
सर्षपाश्चविद्वेषेकाकपुच्छकैः ॥ उलूकादितथापात्रैश्चूर्णंभल्ला
तकैःसह ॥ ९ ॥ मारणेचतथाद्रव्यंस्याद्विजंकनकस्यच ॥ वटस्यक
टुकीयानिबोलारव्यंसर्षपैःसह ॥ १० ॥ तिलाज्यैःशांतिकेकुर्याद
तःसिध्यंतिनान्यथा ॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं
११ ॥ अथनवग्रहयंत्रोत्पारक्रमः ॥ शनिस्तमःकेतुभृगुःशशी
च सोम्यस्तमोहार्कसुतोगुरुश्च ॥ भृगुःशशीज्ञोदिनपःकुजश्च
जीवार्कसूनुश्चतमःशिखंडी ॥ १ ॥ रविर्धराजःसुरपूजितोर्कजो

a project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7)

ग्रह॰त्र ॥७॥

राहुः शिखंडी कविसोमसोमजाः ॥ ततः शिखंडी शनिराहुसोमजः
कविः सुधांशुर्गुरुसूर्यभूमिजाः ॥ २ ॥ ज्ञो भार्गवो ज्ञः स्फुरपूजितो र
विर्भौमिः शिखंडी दिननाथजस्तमः ॥ ईज्यो विवस्वान्कुजकेतुभानु
जास्तमः शशी ज्ञो भृगुनंदनः शशी ॥ ३ ॥ राहुः शिखंडी शनिसोम
सोमजा दैत्येंद्रमंत्री कुरुते ज्यभास्करः ॥ शशी शशी ज्ञो भृगुजः कु
जो गुरुः प्रभाकरो राहुशिखंडिभानुजाः ॥ ४ ॥ कुजो गुरु भास्कर राहु
केतवः शनैश्वरेंद्र विधुनंदनः कविः ॥ वेधेन हीनं खलु तिर्यगूर्ध्वगाः
स्यात्कोणगश्चोल्लकरस्यपंचकं ॥ ५ ॥ इति रवियंत्रं ॥ कुजज्ञजीवाः
शशिभास्करात्मजो शशी भृगुजस्तमपो दिवाकरः ॥ विधुः शनिः
केतु भृगुस्तमो रविर्भौमिश्च सौम्यः स्फुरराजपूजितः ॥ १ ॥ कविस्त
मो भानुकुजो बुधो गुरुर्निशाकरः सूर्यसुतः शिखंडिजः ॥ गुरुर्मही

राम ॥७॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

जोबुधकेतुधिष्ण्या:शनैश्चरोभास्करभार्गवोतम:॥२॥शिखीक
लावानूरविजोर्कभार्गवास्तमेंदूपूज्योकुस्कतेंदुसंभवो॥दिवाकर:
शुक्रतमोगिरांपति:कुजोबुध:केतुविधूशनैश्चर:॥३॥सौम्योगु
रुर्भूतनय:शनैश्चरोशिखीकलावांस्तमसूर्यभार्गवा:॥मंद:शि
खीसोमतमोदिवामणि:कविर्बुधोदेवस्कपूजित:कुज:॥४॥तमो
रविर्भार्गव:सोमजोगुरुर्धरास्कतोमंदशिखंडिजोशशी॥वेधेनही
नंखलुतीयगेर्ध्वित:स्यात्कोणतोपनभगोर्हियंभकं॥५॥इतिभृगु
यंत्रं॥तमकेतुदिवामणिमंदकुजागुरुसोमकलानिधिजाभृगुज:॥
शनिभूस्कतगीष्पतिचंद्रबुधा:कविराहुशिखंडिसहस्रकरा:॥
१॥शशिसोमजशुक्रतमाश्वशिखीरविभानुजभूमिजवाक्पतय
:॥इनराहुशिखंडिजगीष्पतय:शनिभूस्कतभार्गवसोमबुधा:॥२॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai
"a joint project of the ..."

ग्रह-च गुरुमंदकुजाःकविचंद्रबुधाघृणिरश्मितमोशिखिनांगणयः॥उश
॥८॥ नाचशशीशशिजश्चरविस्तमःकेतुस्फुरेज्यशनिक्षितिजाः॥३॥
शिखिभास्कर राहुधरातनुजागुरुमंदविदःकविराड्द्विजराट्॥
कुजगीष्पतिमंदबुधाश्चकविर्जलजातशिखीयमकराविधुसुक॥४
न्नकवींदुशिखीघ्नकराश्चतमःक्षितिनंदनवाक्पतिभास्करजाः॥
विधुयंत्रमिदंविमलंद्विगुणेशशिरंजापतिनाकथितंचपुरा॥५॥
इतिचंद्रयंत्रं॥२॥शिखिभानुककाविधुराहुविदःकविभूसुतगीष्प
तिसूर्यसुताः॥तमविद्गुरुजीवानजाश्चगुरुःशनिकेतुदिवाकर
शीतकराः॥६॥कुजजीवदिवामणिजाश्चशिखीरविसोमखगारि राम
विदःकविराट्॥शशिकेतुदिवाकरकाव्यतमाःशशिजोर्कजभू ॥८॥
मिजवाक्पतयः॥२॥भृगुराहुबुधाःशनिभूतनयोसुरपूजितसो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

मशिखिविकरा ॥ रविजारसुरेज्यकलानिधयः शिखिसूर्यसिताश्च
तमः शशिजः ॥ ३ ॥ इनश्चंद्रशिखिज्ञसिताश्च तमः सुरपूजित
भास्करजावनिजाः ॥ बुधकाव्यतमेज्यदिवामणिजाः कुसुग
र्ककलानिधयश्च शिखी ॥ ४ ॥ गुरुमंदकुजारविशीतकरौ शिखि
सोमजभार्गवसिंहिकाः ॥ धरणीसुतयंत्रमिदं विमलं कथितं वि
भुना खलु शल्यभता ॥ ५ ॥ इति कुजयंत्रं ॥ ४ ॥ जीवः काव्यः पंगुसौम्यो
चकेतुश्चंद्रो राहुर्लोकचक्षुर्धराजः ॥ सौम्यः केतुश्चंद्रमा राहुरर्कः
पृथ्वीसूनुर्जीवकाव्यौ शनिश्च ॥ २ ॥ राहुः सूर्यो भूसुतो जीवकाव्यौ मं
दः सौम्यः केतुरब्जः क्रमेण ॥ सौरिर्जीवो दैत्यमंत्री कलावान् सौम्यः
केतुर्भूसुतो राहुरर्कः ॥ ३ ॥ चंद्रः सौम्यः केतुरारस्तमोर्कौ सौरिर्देवा
नां पुरोधा कविश्च ॥ सोमो राहुः सूर्यमंदौ सुरेज्यः काव्यश्चंद्रश्चंद्रसू

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, joint project

(१)

ग्रह-म ॥२॥ नुश्चकेतुः॥३॥काव्यः सौरिर्जीवसंज्ञश्चकेतुश्चंद्रज्ञार्कभूमिजः सैं
हिकेयः॥केतुश्चंद्रश्चंद्रजोभानुरारो राहुः काव्यः सूर्यजो वाक्पति
श्च॥४॥सूर्यो भौमो राहुकाव्योशनिश्चजीवः केतुश्चंद्रमाभूमिपु
त्रः॥प्रोक्तं यंत्रं सैंहिकेयस्य नूनं वेधे हेरं शं शुभाभूतहेतोः॥५॥इति
राहुयंत्रं॥५॥सौम्योजीवः शुक्रभूमी तनुश्चभानुः पंगुः केतुरब्जः
क्रमेण॥भौमोराहुः सूर्यमंदौ शिखीच चंद्रः सौम्यो वाक्पतिर्दैत्य
मंत्री॥५॥सौरिः केतुश्चंद्रमाश्चंद्रजातो जीवः काव्यो भूमिजो राहु
रर्कः॥शुक्रः सौम्यो देवपूज्यार्कभौमौ राहुश्चंद्रः सूर्यपुत्रः शिखं
डी॥२॥भानुर्भौमो राहुरब्जश्च सौरिः केतुः काव्यश्चंद्रपुत्रः सुरे राम
ज्यः॥अब्जः पंगुः केतुकाव्यो बुधेज्यो मार्तंडारो सिंहिकानंदन ॥१॥
श्च॥३॥ईज्यः काव्यः सोमसूनुस्तमो कौक्षोणीसूनुः केतुरब्ज

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

श्च पंगुः॥ राहुः सूर्यारो शिखी चंद्रमंदौ देवेज्योभार्गवश्चंद्रपुत्रः॥
४॥ केतुश्चंद्रः सूर्यजेज्यो कविज्ञो राहुः सूर्यो मेदिनीनंदनश्च॥ एतद्यंत्रं
सूर्यपुत्रस्य नूनं वेधे हीनिंश्च लिता पूर्वमुक्तं॥ ५॥ इति शनियंत्रं॥ ६ कवि
पंगुराहुगुरवः सविताकुजकेतुसोमशशिजाः क्रमशः॥ गुरुभानुभौ
मशिखिनश्च विधुर्विधुजः कविरत्नपनजस्तमपः॥ १॥ शिखिसोमवि
धुजमंदतमाः स्फुरपूज्यभास्करधरातनयाः॥ तमभार्गवार्किकुजवाक्पत
यः सवितांबुजन्मशिखिजन्मजाः॥ २॥ कुस्फुतेज्यभास्करविदश्च शि
खीविधुराहुभार्गवदिवाकरजाः॥ शशिखीदुराहुकविसूर्यसुताधर
णीसुतः सुरगुरुः सविता॥ ३॥ शनिराहुकाव्यतमनक्षितिजाः स्फुर
पूज्यसोमविधुजाश्च शिखी॥ तपनारगीष्पतिशशांकविदः शिखि
पंगुराहुकविराजमणिः॥ ४॥ विधुविच्छिखी रविजासिंहिसुताः कवि

(10)

ग्रह-च ॥१०॥ भास्कराविनिजवाक्पतयः॥ खलुयंत्रमेतदुदितंशिखिनः प्रभुणात्ववे
धराहितंसगुणं॥५॥ इतिकेतुयंत्रं॥७॥ विधुभौमवित्तपनकाव्यतमाःसु
रवंद्यभास्करसुतोचशिखी॥ इनकाव्यराहुगुरुसूर्यसुताःशिखिसो
मसंगलशशांकसुताः॥१॥ गुरुमंदकेतुशशिभूमिसुताःशशिजो
रविर्भृगुसुतश्चतमः॥ शशिजेज्यभूतनुजसिंहिसुतारविकाव्यकेतुगु
रुसूर्यसुताः॥२॥ तमभानुकाव्यशशिनश्चगुरुः शनिसोमजांबुजधराव
नुजाः॥ शिखिजीवपंगुशशिजाश्चशशीधरणीसुतस्तमरवीभृगुजः
॥३॥ कुजसौम्यमंदकवयश्चतमः सविताशनिः शिखिगणश्चगुरुः॥
कविराहुभानुरविजश्चशिखीसुरपूज्यभौमशशिजाश्चशशी॥४॥ शनि राम
केतुजीवकुजसोमसुताःशशिकाव्यराहुतपनाःक्रमशः॥ सुरपूजि ॥१०॥
तस्यखलुयंत्रमिदंत्रिपुरांतकेनकथितंसगुणं॥५॥ इतिगुरुयंत्रं॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of

(10A)

भानुसोमकुजकेतुसुरेज्याः सूर्यजः शशिसुतः कविराहू॥
केतुजीवशनिसौम्यभृगुजाराहुभानुशशिभूमितनुजाः॥१॥
सौम्यकाव्यतमभानुशशांकाभूसुतः शिखिगुरुरविजश्च॥भौ
मभानुशशिभार्गवतनूजाः केतुजीवतमसौम्यसिताश्च॥२॥मंद
केतुगुरुराहुबुधाश्च काव्यभूसुतदिवाकरसोमाः॥राहुसौम्य
भृगुमंगलसूर्याः सोमपंगुशशिखिगीष्पतयश्च॥३॥सोममंग
लदिवाकरजीवाः पंगुकेतुकविराहुबुधाश्च॥जीवपंगुशिखि
काव्यतमाश्च सौम्यचंद्रधरणीसुतसूर्याः॥४॥शुक्रराहुबुध
चंद्रमहीजाः सूर्यजीवशनिकेत्वभिधानाः॥पंचमेतदमलं हि बु
धस्य वेधहीनमुदितं शशिमूर्ध्नि॥५॥इति बुधयंत्रं॥६॥इति
नवग्रहयंत्रप्रकारः॥अथ यंत्राणां स्थाननिर्णयः॥मध्ये यंत्रं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(17)

नवग्र-च भास्करस्योत्क्रमस्मात्पूर्वेशुक्रस्याग्निकोणेविधोस्यात्॥याम्ये
॥९३॥ भौमस्योत्क्रमात्पश्चराहोर्नैर्ऋत्येस्यात्सम्भिमेसूर्यसूनोः॥१॥केतो
र्वायव्यांदिशिस्यादुदीच्यांजीवस्यैशांबोधनस्यक्रमेण॥एवंस
र्वेषांसुतोस्यात्स्वयंत्रंयस्मिन्नस्तिधस्साधिताःसिद्धयस्तु॥२॥
इतिश्रीपद्मपुराणेरुद्रयामलेउमामहेश्वरसंवादोक्तंनवग्रह
यंत्रंसमाप्तं॥ ॥छ॥श्रीमत्सीतारामचंद्रार्पणमस्तु॥छ॥
अथान्यत्प्रकारांतरं॥श्रीपुरसगीर्वांकेकस्यारंभकाःख
गः॥दिवाकरादिकेस्तंतानिवेपास्तुःक्रमात्स्मी॥१॥आया
कुत्रिशुचिरंगमनागस्ततनःकरः॥करादिजोगजाहुणाबाणाद राम
ग्निस्ततःशुचिः॥२॥अधोर्ध्वमध्यत्रितयाद्वितीयेतद्गतानशु ॥९३॥
चो॥मध्याधोर्ध्वक्रमाग्निस्यान्कुत्वाद्येपिपूर्ववत्॥३॥तस्या

(11A)

न्नूपंचागयोः प्राग्वत्स्वषष्ठस्थांस्तूर्यचक्रेन्नान्॥ अष्टमांकाख्य
योः प्राग्वद्विलिखेत्क्रमशो बुधः॥५॥ इतिनवग्रहयंत्रं॥ ६॥
शाके १७९८ धातृनामसंवत्सरे माघशुक्ल २ बुधेइदंपुस्तकं
समाप्तं॥ श्रीनवग्रहार्पणमस्तु॥ श्रीरामः श्रीयमांनमम॥ ६
मारुलकरोपनामककृष्णभटकेरामहात्मजरामकृष्णेनलिखितं॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com